इ. वि. का. राजवाडे संशोधन मंडळ धुळें.

—: हस्त लिखित ग्रंथ संग्रह :—

ग्रंथ क्रमांक १३५. वे. २५ (२७१)

ग्रंथ नाम अमृतानुभव.

विषय म. वेदांत.

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1)

नं. २

॥ अथ प्रल्हादकृत अनुभवामृत सप्तश्लोक प्रारंभः ॥

पत्राणि ४८

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः ॥ श्रीमत्परब्रह्मणेनमः ॥ अथप्रल्हादकृतानुभवामृत सं.प्र.
सप्तश्लोकीप्रारंभः ॥ प्रथमेस्मिन्प्रकरणेप्रवृत्तेःपुरुषस्यच ॥ नमनंज्ञानदेवे ३
नकृतमद्वैतभावतः ॥१॥ एवंयज्ञायतोमूळंजनकंनिरुपाधिकं ॥ शिवशा
स्यात्मकंद्वंद्वंवंदितंतन्मयाभृशं ॥२॥ यःप्रियःसाप्रियाभूत्वाप्रीत्यास्वसु
खलिप्सया ॥ चारास्थव्याप्यैकपत्नीकोएकांगोसंस्थितावुभौ ॥३॥ प्रीतिप्रवा
हवेगेनविमिळंतौपरस्परं ॥ किंतुद्वैतस्यचव्याजादुद्रूळंतौननिश्चयः ॥४
यदेकंनभवेत्तत्रद्वयोर्द्वित्वंकुतस्तरां ॥ साकारौवानिराकारौनजानीमः
(2) स्वरूपतः ॥५॥ कथंस्वस्वरूपंबुध्योतौद्वैतभावेनमीलितौ ॥ कौतुके
नापिनैकत्वंददतौस्फुरितुमथ ॥६॥ रस्यैंवियोगभीरूलौस्फुरतौबाळ ३
जगन्मित्तं ॥ तथापिद्वैतभावोयंजगत्यस्मिन्नखंडितः ॥७॥ चराचरस्य

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

संसारः स्वांगे संदर्शितः खलु ॥ नददंतौ तृतीयस्य स्पर्शं भावितुमप्य
(2A) णुं ॥ ८ ॥ एकसत्ताप्रकाशाभ्यां आसनं भासनं द्वयोः ॥ अनाद्येकत्वभावे
न दंपती तौ न नंदतुः ॥ ९ ॥ निमज्ज्यैकरसे प्रीत्याभेदस्तस्मात् सकृज्जयात् ॥ ब
हिः स्वानंदभोगाय द्वैतमाद्यनिर्णयौ ॥ १० ॥ देवेन देवी संपूर्णा तां विनास
दिगंबरः ॥ किं बहुनैकोपजीव्यो दंपती तौ मिथस्तरां ॥ ११ ॥ कथमेकापकः
प्रीत्या तयोरासीत्परस्परं ॥ जगत्त्रयेन मात्वा यो विरेजतुरणुष्वपि ॥ १२ ॥
एकमेकं विनायाभ्यां निर्ममेनत्तृणादिकं ॥ प्राणादपि च श्रेयांसावन्योन्यं
दंपती च तौ ॥ १३ ॥ रहस्ये तु निपुणो यद्वा स्वापिति पूरुषः ॥ तद्वद्दांपत्यभा
वेनाजागर्ति गृहिणी स्वयं ॥ १४ ॥ तयोर्द्वयोरेकतरत्रिद्रांतौ यदि जागर्यात ॥
यासित्वा सगृहं सर्वं न किंचिदवशेषयेत् ॥ १५ ॥ विज्ञाथांग द्वयं याभ्यां एक

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

भावेन संस्थितौ ॥ पुनरर्धार्धभागेन भेदवंतौ बभूवतुः ॥१६॥ आश्रयश्चैकमे सं·प्र·
कस्य विषयश्च परस्परं ॥ अन्योन्यौ सुखिनौ तद्वदन्योन्याभ्यां निरंतरं ॥१७॥ स्त्री ३
पुन्नाम त्र भेदेन नंदत्येकः शिवः स्वयं ॥ ययोरर्धार्धभागेन भाति वै सकलं जगत् ॥
१८॥ दंडद्वये श्रुतिश्चैका सुगंधः सुमनोद्वये ॥ दीपद्वये यथैवैका दीप्तिः संराज
तेतरां ॥१९॥ ओष्ठद्वये यथैवैका वाक् दृष्टिश्चैका नेत्रयोः ॥ द्वाभ्यां तथा जीव
स्त्वाष्टरेकै वेति श्रुतिर्जगौ ॥२०॥ अनादिमिथुनं चैतत् प्रकृतिपुरुषात्मकं ॥
एकत्रैकं रसं भुंक्ते द्वैतं संदर्शयन्वात्मनः ॥२१॥ स्वामिसत्तां विना स्यात्तु नश
3) क्नोति पतिव्रता ॥ यां विना सर्वकर्तापि नैव किंचित्करोति सः ॥२२॥ भर्तु
यादर्शनं यस्याभर्ता चैवासनं किल ॥२३॥ न ज्ञायते न्वयच्छंद्व निर्णेतुं तत्
स्वरूपतः ॥२३॥ यथा गुडस्तथा स्वादः कर्पूरस्तस्य सौरभं ॥ पृथक्त्वेनापि २
निर्णेतुं विवेकः पंगुतां व्रजेत् ॥२४॥ दीप्तौ तु दृश्यमानायां तत्सैन्वायातिदी

A project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A) पक्षः ॥ तद्वद्युस्याभिचारे तु लभ्यते शिव एकलः ॥ २५ ॥ प्रभया राजते सू
र्यः प्रभा गर्भगतो रविः ॥ तद्वदेद्दं यसित्वानुप्रभे चैका विराजते ॥ २६ ॥ द्यो
तकं प्रतिबिंबस्य बिंबं बिंबानुमापकं ॥ प्रतिबिंबं तथा द्वैतव्याजे नैकोवि
राजते ॥ २७ ॥ सर्वे शून्यस्य निष्कर्षः सकृतः पुरुषो यया ॥ येन भर्त्रा स्वसत्ता
याविशेषाच्छक्तिरुत्कटा ॥ २८ ॥ न शक्नोति शिवे स्थातुं शिवत्वं यां प्रियां वि
ना ॥ शिवात्मना शिवेनैव घटितं [illegible] स्वीकृत्या ॥ २९ ॥ ऐश्वर्येण महेशस्य
सृष्टिः स्वांगे कृता यया ॥ स्वकीय[illegible]द्वयस्यापि या हेतुः स्वयमेव हि ॥ ३०
अरूपं स्वपतिं वीक्ष्य भक्त्या प्रस्यनुरूपा ॥ अलंचक्रे जगन्माये नामरू
पादिभूषणैः ॥ ३१ ॥ यत्र त्वेकस्य दुष्कालस्तत्र बाहुल्यसंभ्रमः ॥ या सौभा
ग्यवती तस्या लीलया तत्र दर्शितः ॥ ३२ ॥ स्वांगस्य लोपमात्रेण का

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अमृ॰ तस्योत्कर्षं तात्कृता ॥ येन कृत्वा स्वसंकोचं प्रियेयाग्रे प्रस्फुटीकृतां ॥ ३३ ॥ यस्या सं॰ प्र॰
२ दर्शनलोभेन ध्रुव्धोऽद्य च्छलं माप्नुयात् ॥ यामपश्यन्नयं क्षितिच्छिन्नजांगय ३
जतिक्षणात् ॥ ३४ ॥ कांतनामर्यादयानूनं संजातो योजगन्मितः ॥ तत्वेनालो
चितेयास्मिन्नभावो नाम रूपयोः ॥ ३५ ॥ एतावन्मंदरूपेण विस्तृत्य लसन्वि
लुप्यति ॥ यस्याविभवतो जातः स ऐ[illegible]धरूपकः ॥ ३६ ॥ ययाजागरितो
भर्ता वेद्यान्नं बहुलं च तत्र ॥ भोजयित्री तया सार्धं भुक्त्वा तटस्थः सचाभव
(५) त् ॥ ३७ ॥ निद्रिते भर्तरि स्वीये प्रसूते यान्चराचरं ॥ यस्यां विश्राम्यमाणा
यां पुरुषत्वं विलुंपति ॥ ३८ ॥ यः कांतालोकनुमिच्छेत् तद्दशाद्दर्शितो हि स
हः ॥ तावुभावुभयोर्यस्मादर्शको मुकुरो समो ३९ ॥ स्वादसात्मानमानं
दो यस्याः स्वांगसंगजः ॥ सर्वभोक्तानगृह्णाति यत्किंचिदपि यां विना ॥ ४० ३

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A) यावेयत्स्यात् प्रियस्यांगं यस्याः सौभाग्यकं प्रियः ॥ कारुण्यत्वाद्द्वयं भा
गं जेमतौ तावुभावपि ॥ ४१ ॥ यथा गति समीरेण सहितात स्वरूपिणी ॥
कांतिः स्वर्णात्मिकातद्वच्छिवेन सकला शिवा ॥ ४२ ॥ गंधात्मिकैव कस्तूरी
उष्मणा सहितो नलः ॥ तथा शान्ति स्वरूपेण भाति वै सकलः शिवः ॥ ४३ ॥
अहोरात्रं स्वरूपेण मृषा स्यात् सूर्य संगतं ॥ तथा सत्यं स्वरूपे स्वे मिथ्याभू
तावुभावपि ॥ ४४ ॥ बहुनोक्तेन किं तौ द्वौ शब्दमात्र स्वरूपिणौ ॥ प्रणवो
क्षर रूढायादशातस्या स्तकेचेरिणो ॥ ४५ ॥ अस्त्वेतन्नाम भेदं वै यत्सत्ये
कार्थताद्द्वयोः ॥ सो मितो दंपती साक्षात् ज्ञानदेवो ब्रवीदिदं ॥ ४६ ॥ ये
योरालिंगने चोभौ विशी णौ स्वस्वरूपतः ॥ रजन्यामागतायां तु दृष्टिः
शीर्णा यथा भवेत् ॥ ४७ ॥ ययोः स्वरूप निर्धारे स परा वैखरी गला ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अमृ· सिंधुनासंगहत्तागंगा यथामग्नाळयाबुनि ॥४८॥ व्यांचत्यसहितोवायु सं·प्र·
४ जीर्णे व्योमोदरे यथा ॥ यथावासप्रभोभानुकुंस्तः प्रळयतेजसि ॥४९॥ य ३
योराळोन्चनेत्तादृक्सदृग्दर्शनकंगतं ॥ भूयस्तोदंपतीसाक्षान्नुतोविश्व
कुटुंबिनो ॥५०॥ ययोः प्रवाहेचेयस्य वेदकोनैदकंपिबेत् ॥ नेदंकुतूहलं
किंतु निजांगंसृजतिक्षणात् ॥५१॥ तत्राहंनमनंकर्तुं यादृशिष्ये द्वितीयकः
तद्वापरोलिंगभेदस्त्वेत्तस्मादाधिकोस्तिकं ॥५२॥ हिरण्मयंहिरण्यंहि य
(5) थाभिन्नत्तयाभजेत् ॥ इदंन्चापितथैवास्ति सर्वद्वावंदनं मम ॥५३॥ वा
च्येवोच्चमानायांवोन्चायामेतयोर्द्वयोः ॥ वान्च्यवान्चकयोर्भेदस्पर्शः
स्यात् किंमिथोवद ॥५४॥ स्त्रीपुंनामप्रभेदेन गंगासागरसंगतिः ॥
संविभातितथाप्यस्ति पानीयेद्वैतताकिमु ॥५५॥ भास्यभासकताद्वै ४

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

तंस्मिन्संदर्शयन्रविः ॥ तथापि सवितुस्तस्य किमेकत्वं विभिद्यते ॥ ५६ ॥
चंद्रोपरि भवेद्यद्वच्चंद्रिकाया विकीर्णता ॥ दीप्तिं विनोपलब्धिः स्यात् किमु
दीपस्य कुत्रचित् ॥ ५७ ॥ मौक्तिकस्य प्रभा यद्वन्मुक्तोपरि समुल्लसेत् ॥ आधि
कं निर्मलत्वेन भ्राजते मौक्तिकं तया ॥ ५८ ॥ मात्राभिस्तस्त्राभिर्भिन्नो भिन्नाभिः
प्रणवः किमु ॥ रेखाभिस्तस्त्राभिः किं भाषाकारो भेदमाप्नुयात् ॥ ५९ ॥ नव्वलेदे
क्यमूलं चेत्स्वसुशोभाधिका भवेत् ॥ निजोर्मि मुकुलान् कस्मात्तदार्कं नाव
तं सलु ॥ ६० ॥ एवं भवानि भूतेशौ यावभिभावनादितः ॥ अवचनोऽहं न स्कत्तुं
अकृत्वा भिन्नभावनां ॥ ६१ ॥ प्रतिबिंब विशोद्धिं बेदर्पणस्यागमात्तु ॥ रु
धे वायोस्तरंगेण यथांभासि विलीयते ॥ ६२ ॥ आत्मावस्थानमाप्नोति ॥
तन्निद्रस्ततक्षणे ॥ तद्वन्मया भाति स्यागाद्देवीदेवौ नमस्कृतौ ॥ ६३ ॥ ह्य
क्तलोभमहंतायाः सैंधवं सिंधुतां भयात् ॥ तथैवाहं मते स्त्यागादभवं

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अमृ· साम्बशंभुभाक्॥६४॥ रंभागर्भे यथाकाशे प्रविष्टो यां दशामियात्॥ सं·प्र·
५ शिवशक्तिसमावेश॥ न्मया तद्द्वं नमस्कृतं॥६५॥ इति श्रीप्रल्हादकृतौ 3
यां अनुभवामृतसमश्लोक्यां ऐक्यभावेन प्रकृतिपुरुषनमनं नाम प्रथ
म प्रकरणं॥१॥ श्रीकृष्णार्पणमस्तु॥ ॥ ॥ ॥ ॥
श्रीसद्गुरुपदद्वंद्वं निर्द्वंद्वपददायकं॥ द्वंद्वातीतं नमहं वंदे द्वंद्वदुःखैकभंजनं॥
१॥ द्वितीयस्मिन्प्रकरणे वंद्यवंदकभावनां॥ विलोप्य ल्हानदेवेन कृतं श्री
(6) गुरुवंदनं॥२॥ अधुनोपायविपिनेव संतोयो विराजते॥ सौभाग्यतंतु
विद्यायांमूर्तिमान्करुणार्णवः॥३॥ अनाद्यविद्याविपिने जीवभावेन
यन्भ्रमत्॥ चैतन्यं तत्समुद्धर्तुं कृपया योभिधावति॥४॥ मायेभमुपसं
हृत्य मुक्तिमुक्ताफलोदनं॥ भोजयेत्सद्गुरुर्यस्तं निवृत्तिं प्रणमाम्यहं॥५॥ ५

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

यत्कृपापांगपातेनबंधोमोक्षत्वमाप्नुयात् ॥ज्ञाताज्ञातारमन्वेतियस्यसं
(6A) निधिमात्रतः ॥५॥केवल्यहेमदानेयोनोत्तमाधममीक्षते ॥द्रष्टृत्वदर्शने
योयेसमर्थःसंप्रकीर्तितः ॥७॥स्वसामर्थ्यप्रभावाद्योगुरुत्वेनशिवंजयेत्
पश्येदादर्शकेयस्मिन्नात्मापिस्यात्मनोमुखं ॥८॥बोधश्चंद्रकलायायावि
कीर्णास्तत्रतथाहि ॥वस्त्वैक्यत्रतःसर्वयत्स्वरूपापौर्णिमातिथौ ॥९॥समा
प्तंस्यादुपायानांधावनंयस्यदर्शनात् ॥प्रवृत्तिलक्षणागंगास्थिरास्याद्य
त्रसागरे ॥१०॥यस्यानवसरेदृष्टामूढःसस्यातिदृश्यतां ॥बहुरूपमिदंस
र्वंविनश्येद्यस्यसेवनात् ॥११॥स्वात्मलाभमेधतामिस्त्रंस्वबोधसुदिनेनत
त् ॥यत्प्रसादार्कसंपर्काद्यातिस्वच्छप्रकाशतां ॥१२॥यत्स्वरूपासलिलेस्ना
तःशुद्धोजीवश्यान्नभवेत् ॥यच्छिवत्वमप्यशुचिनांगेलापयतिस्वके ॥१३
रक्षमाणेस्वकेशिष्येगुरुत्वंहरतिस्थितं ॥तथापिसहसायंवैगुरुत्वंनाव

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अमृ. मुंचति ॥१४॥ एकत्वं न स्फुरत्यायातो गुरुः शिष्यभिन्नेण च ॥ पश्य देवात्मनो रू सं. प्र.
६ पं पश्यतीति द्विधा भवेत् ॥१५॥ यत्कृपायास्तु षारेण परिस्याद्वियकं विषं ॥ २
परिणमय्य पारेण बोधाख्येनामृतेन तु ॥१६॥ दृष्टा वेद्यं वेदको स्रौ उदरे या
ति वै तदा ॥ तथापि दृष्टिरुच्छिष्टा न भवत्यात्मतां गता ॥१७॥ यत्सहायत
यानूतं जीवो ब्रह्मत्वमश्नुते ॥ औदासीन्येन यस्याशु ब्रह्मापत्तृणता भया
त् ॥१८॥ यस्योपास्तेरुपायाः स्युः फलभारैः सुसंभृताः ॥ परिपक्वदशा
मेत्य संस्थिता यदनुज्ञया ॥१९॥ यस्य दृष्टिं ससंतो नो प्रविशेन्नेगमे वने ॥ ता
वदात्मफलं तस्य हस्ते नायाति कर्हिचित् ॥२०॥ पुरो दृष्टेः प्रसारेण स्पृष्टे
वा वर्तते पुनः ॥ एतावंतं तु विजयं नैव गृह्णाति चात्मनि ॥२१॥ लघुत्वमू
लरूपेण निवसन् गौरवे पदे ॥ यन्नास्ति तन्नाशयित्वा सर्वदा भगवान्हि ६

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai — joint project

(७A) यः॥२२॥ निर्जले मज्जते येन घनीभूते न तीर्यते ॥ तीर्णेन नावा शिब्ये
तयेन कुत्रापि वास्थले ॥२३॥ सावयचोयमाकाशो न बध्यायवकाश
ता ॥ अस्ति चेवं कश्चिदेकः संभृताकाश एव यः ॥२४॥ चंद्रादीनि सुरी
तानि यन्मेळ प्रभवानि वै ॥ यच्छाययाहि सूर्योपि सोज्वळत्वेन भासते
२५ ॥ शिवोपि जीवभावेन प्रसित्वा स्वरश्र ॥ पुनः ॥ आयातुं सुमुहूर्तं वै देव
ज्ञं पृच्छति स्वयं ॥२६॥ स्वप्रभा चंद्रिकाद्दे तद्धि गुणाप्रावरतापि वै ॥ तथापि
यस्य चंद्रस्य प्राकट्यं न व्रजेत्किंच ॥२७॥ यो भिव्यक्तोपि नो भाति भारू
पोपि न भाति सभ्र अस्तित्वे नैव नास्ती ॥ तं भासते यत्र कुत्रचित् ॥२८॥ अधुना
यः स शब्दाभ्यां प्रमाणं किं करोम्यहं ॥ प्रमाणस्याप्यविषयः सकलस्य वि
षयो भवेत् ॥२९॥ यत्र शब्दो निवर्तेत तेन साकं प्रवीलसत्सौ द्वितीयस्य तु रोषे
ण स्वकत्वस्यापि कुप्यति ॥३०॥ तदा भाति प्रमेयं च प्रमाणं प्रसरेद्यदा ॥ आ

अमृ· ८ श्वर्यमुस्यधुर्यस्य नास्तित्वस्य च लाघवं ॥२१॥ किंचित्कदाचित्समयेप सं·प्र· २
श्याम्यद्वैतभावतः ॥ चमत्कारमेदर्शनं तत्तु व्यलीकं सुविनिश्चितं ॥२२॥ तत्र न
साथस्तुत्या वाचक वचो निदधे पदं ॥ अंगे संलाप्य सर्वत्र येन नाम्नैव वंचितं ॥
२३॥ आत्मन्यात्मप्रवृत्तिर्नो निवृत्तिस्तत्र वै क्व च ॥ अथापि नामावरणं व्य
लीकं न जहाति च ॥२४॥ निचयं मे चनास्त्यादौ निवर्तयाति किं पुनः ॥ उपविष्टः
कथं तर्हि निचस्याख्येपदे स्वयं ॥२५॥ अंधकार स्वरूपेण कदाचिद्गोचरो
रवेः ॥ तथापि तमेतिरीरिति प्रसिद्धिरस्त्यस्य चागता ॥२६॥ जडं प्रकाशो लेये
नमिथ्याभूतं विरूढति ॥ न घटते तत्त्वटत्तयस्य मायाविलासतः ॥२७॥
मायातो दर्शयस्यंग मायिकं तन्निषेधसे ॥ अमायिक स्वरूपस्त्वं कस्या
प्यविषयः खलु ॥२८॥ शिवशिव गुरुस्वामिन् रूढं त्वां किं करोम्यहं ॥ एकं ८
हि निश्चयं कर्तुं न ददासि कथं च न ॥२९॥ बहुशो नाम रूपाणि व्युत्पाद्योद्व

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

सिताानिच ॥ परंतुनिजसत्तायास्तुष्टोस्यावेशतोनकिं ॥ ४० ॥ सर्वंक
र्तुंनज्ञानासिजीवितग्रहणंविना ॥ स्वाभिभावेनशिष्येतशिष्योनेदंत
थाभवेत् ॥ ४१ ॥ विशेषस्याभिधानेनआत्मत्वंनसहेखलु ॥ किंबहु
नास्यनोभाव्यंकेनाप्येतद्विनिश्चितं ॥ ४२ ॥ अथवारजनीसूर्येनाति
ष्ठेद्दृढवर्णजले ॥ नावाशिष्येयथानिद्राजागरेस्वस्वरूपतः ॥ ४३ ॥ कर्पू
रव्यक्तिलावण्यमग्नेश्चापिनतिष्ठति ॥ नामरूपंतथैवास्यनोकिंचिदपि
तिष्ठति ॥ ४४ ॥ वंदनायभजाम्येयंवंद्यत्वेननातिष्ठति ॥ वंद्यवंदकभेदो
यंएतस्मिन्नैवतिष्ठति ॥ ४५ ॥ नकरोत्युदयंभानुरात्मानंप्रतिकर्हिचि
त् ॥ वंदनायतथैवायंवंद्योनैवभवेध्रुवं ॥ ४६ ॥ किंचात्मनःसंमुखत्वं
नप्राप्येतकदाचन ॥ तथैवानेनवंद्यत्वंहत्वानिष्कासितंबहिः ॥ ४७ ॥ आ
काशस्ययथादर्शेनोतिष्ठेत्प्रतिबिंबकं ॥ नमस्कारायवंद्योसौनभवेदि

"Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

अमृ. तिकौतुकं ॥४८॥ नभवेच्चेन भवतुग्रहीयांवक्रतांकुतः ॥ चंद्रकस्यापि य सं.ग्र.
८ त्स्थानंनददाम्यवशेषितुं ॥४९॥ बहिःस्थेपद्धुचेन्चैकेस्फालितेसतिसत्वरं ॥ २
नस्फेलितोपिस्फुरतिपद्धुवश्चांतरस्थितः ॥५०॥ गृहीत्वासहितंबिंबं
(9) प्रतिबिंबंविनश्यति ॥ नीतंयंचत्वमेतेनचंद्रकेनसहैवहि ॥५१॥ तत्रास्ति
दृष्टेः किंकार्यंनरूपंयत्रविद्यते ॥ अस्माकंफालितोश्रीमत्पादोतावीदृशीं
दशां ॥५२॥ प्रज्वलेद्दीपकलिकाउष्णत्वेनाभिसंगतः ॥ कर्पूरपुत्तिकासातुना
पुयात्संगमात्रतः ॥५३॥ अन्योन्यंनद्वयोर्यावत्किंचिद्दालिंगनंभवेत् ॥ उभ
योस्तत्क्षणेनैवस्वरूपंनैवशिष्यते ॥५४॥ नपश्येयमिमंयावद्गतोवैचंद्रत्व
वृंदकौ ॥ यथाजागरदृशायांतुस्वप्नकांतोनतिष्ठतः ॥५५॥ किमनेनबहू
क्तेनद्वैतरूपंनिरस्यते ॥ स्वसरवासद्गुरुः साक्षान्निवृत्तिर्वंदितोमया ॥५६ ८
आश्चर्यमस्यसरव्यस्यस्वांगेनैकत्वमप्युत ॥ गुरुशिष्यात्मकद्वैतविस्तरो

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(9A) बहुशः कृतः ॥५७॥ कथं द्वैतं विना सर्वं कृत्वा चात्मानमात्मना ॥ विलक्ष
णः स्वयं स्वस्माद्वैतं नास्तीति नो भवेत् ॥५८॥ यस्योदरे जगत्सर्वं भाति यद्व
न्गगनोपमं ॥ तदेव तन्नास्ति भाव निष्कर्षं सहते पुनः ॥५९॥ यथा सिंधुः पू
र्णताया आश्रयोप्यथ दुर्भरः ॥ विरुद्ध धर्मयोर्यस्य गृहे भ्रात्कृणिकं तथा ॥
६०॥ तेजस स्तम सश्चैव सूर्यं वैरं परस्परं ॥ परं तु ते उभे सूर्ये सूर्यरूपेण
तिष्ठतः ॥६१॥ यदेकं भण्यते तच्च भिन्नं नानेव नंदति ॥ परस्परं विरुद्धं य
द्विरुद्धं तन्नाच्चात्मनः ॥६२॥ अतः शिष्यो गुरुश्चेति शब्दयोरनयोर्द्वयोः
एकोर्थः श्रीगुरुः साक्षात् द्विधा रूपेण संस्थितः ॥६३॥ सुवर्णं चा
प्यलंकारः सुवर्णत्वेन तिष्ठतः ॥ चंद्रश्च चंद्रिका चैव भाति ता चंद्र एक
लः ॥६४॥ कर्पूरस्तस्य चामोदः कर्पूरः केवलः स्वयं ॥ स्वादश्च शर्करा

अमृ० द्वाभ्यां शर्करैरेव विराजते ॥६५॥ गुरुशिष्यस्वरूपेण दृश्यते यद्यपि द्विधा सं.प्र.
१ तथापि सद्गुरुः साक्षादेक एव समुल्लसेत् ॥६६॥ आदर्शेऽप्यथवा स्वास्ये २
दृश्योर्ह भित्तिर्वान्यथा ॥ इत्यात्मनः प्रतीतिस्तं मुखं ज्ञानाय संश्रय ॥६७॥
निरंजने निद्रितो यो निर्विचारः स एककः ॥ परं चेता चेतयिता सोऽत हासी
स्वयं द्वयं ॥६८॥ स्वयं चेता चेतयेच्चेति वर्यं च वेदयेत् ॥ इत्थं च यद्गुरु
त्वं च शिष्यत्वं नंदयत्यसौ ॥६९॥ विनादर्शं यदा दृष्टिः स्वात्मदर्शनसंभ्र
मं ॥ लभते तर्हि लीलेयं कानिष्टा न भवेन्मम ॥७०॥ अदत्वा स्फुरितुं द्वैतमे
क्यं चापि विघट्टितुं ॥ सख्यस्य चाप्यतिशयं पुष्णातीति ह्यति कौतुकं ॥७१॥
निवृत्तिर्नाम यस्यैव। निवृत्तित्वेन भासनं ॥ स्वराज्यं हि निवृत्त्यैव निवृत्तित्वेन तिष्ठति
॥७२॥ प्रवृत्तेश्च विरोधेन निवृत्तेश्चैव बोधनात् ॥ आनीयते तथा शब्दान्निवृ १
त्तिर्न भवेद्ध्रुवं ॥७३॥ दत्वात्मानं यथा रात्रिर्दिनमुन्नतिमानयेत् ॥ अन्य

Digital reprint by the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

स्यापेक्षया चासौ निवृत्तिर्न भवेद्ध्रुवं ॥७४॥ उद्वृत्तेन बलेनैव रत्नं सोऽत्र कु
न्नामियात् ॥ तादिदं न भवेद्रत्नं चक्रवर्तिस्वराड्यं ॥७५॥ प्रवेश्य चोदरे व्योम्नो
चंद्रः पुष्यादि वर्धति ॥ तदा तच्छंदिका चंद्रे पतित्वा तत्र कुंठति ॥७६॥ तथाभि
वृत्तिभावस्य कारणं स्वयमेव हि ॥ स्वामोदग्रहणायेव पुष्पं घ्राणमभूत्स्वयं ॥
७७॥ दृष्टिः स्वमुखलावण्यं पृष्ट भागे यदाप्नुयात् ॥ किमर्थं मुकुरायासः कर्त
व्यः सूक्ष्मदर्शिभिः ॥७८॥ किं गतायां त्रियामायां दिवसे च समागते ॥ पश्चा
त्स्वस्योदयं सूर्यः किं कुर्यात्स्वप्रकाशकः ॥७९॥ अतो बोध्येन बोध्येत प्र
माणैः साध्यते थवा ॥ तथा सोन भवेत्किंतु स्वतः सिद्धप्रकाशकः ॥८०॥
एवं क्रियां विनैवेदं निवृत्तित्वं स्वयं भवेत् ॥ तस्य श्रीचरणद्वंद्वे ऐक्यभावे
न वंदितुं ॥८१॥ इत्यलंकारवान्ज्ञानदेवः श्रीगुरोः पदपंकजं ॥ प्रणम्य ऋ
णनिर्मुक्तः कृतं यान्चांन्च तुष्टयं ॥८२॥ इति श्रीप्रल्हादकृतायां अनुभवामृ

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com